# षष्ठः पाठः

*भारतवर्षं सहस्राधिकवर्षाणि परतन्त्रम् आसीत्। वैदेशिकपददलिते दास्यदूषिते तस्मिन् काले मुगलवंशीयानां शासने प्रायशो राजानः युद्धं विनैव मुगलसत्ताधीशानाम् आधिपत्यं स्वीकृत्य तानेव जगदीश्वरान् भावयन्ति स्म। तेषां सेवायां बद्धपरिकराः सन्तः स्वदेशरक्षाव्रतविमुखतां भजन्ते स्म। भारतीयाः सर्वथा निराशां परमात्मानञ्च आश्रित्य जीवनं यापयन्ति स्म। तस्मिन्नेव अन्धकारमये कालखण्डे स्वतन्त्रतायाः दीपशिखेव, आत्मगौरवस्य मूर्तिरिव, प्रतापस्य प्रतिमानम् इव महाराणा प्रतापः मेवाड़राज्ये भ्राजते स्म।*

*प्रतापः भारतीयस्वातन्त्र्येतिहासे स्वतन्त्रतायाः अप्रतिमयोद्धारूपेण स्मर्यते। स्वीये पञ्चविंशवर्षात्मके शासनकाले मुगलैः सह अनेकवारं युद्धं कृतवान्। जीवने नैकाभिः विपरीतस्थितिभिः संतप्यमानोऽपि कदापि पराजयं दैन्यं वा न प्रदर्शितवान्।*

*प्रस्तुतः पाठः प्रातः स्मरणीयस्य प्रतापस्य परिचयं ददाति, येन छात्राः तस्य जीवनेन प्रेरणां प्राप्नुयुः।*

## महाराणा-प्रतापः

उत्सर्गपरम्परायाः उद्भवभूमिं, प्रतापस्य पुण्यभूमिं 'मेवाड़' राज्यं को न जानाति? इदं राज्यं शूराणां शौर्य्येण, यूनाम् आत्माहुत्या, सतीनाञ्च 'जौहर' परम्परया विश्वस्मिन् जगति महतीं प्रसिद्धिम् अलभत। मेवाड़राज्यस्य सिसोदियावंशे बप्पारावल-राणाहमीर-राणासांगा प्रभृति-वीराणां सुदीर्घा परम्परा विद्यते। अस्यामेव परम्परायां महाराणाप्रतापसिंहस्य जन्म विक्रमस्य १५९७ तमे वर्षे (१५४० ईसवीयाब्दे) ज्येष्ठ शुक्लतृतीयायाम् अभवत्। प्रतापः बाल्यकालादेव वीरयोद्धा, कुशलसेनानी, धीरनायकश्च आसीत्। पितुः उदयसिंहस्य अनन्तरं 'प्रतापः' महाराणापदवीं प्राप्य स्ववयसः ३२ तमे वर्षे मेवाडराज्यसिंहासनम् आरूढ़वान्। तस्य राज्याभिषेकः 'गोगुन्दा' ग्रामे अभवत्।

तस्मिन् काले उत्तरभारते मुगलवंशीयानां शासकानां शासनम् आसीत्। राजानः तत्सेवामेव स्वकर्त्तव्यं मन्यमानाः देशरक्षाकर्त्तव्याद् सर्वथा विमुखाः आसन्। मुगलशासकस्य साहाय्यं विधाय आत्मगौरवं मन्यन्ते स्म। शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाड़राज्य-स्थितिः समीचीना न आसीत्। यद्यपि प्रतापस्य पिता महाराणा उदयसिंहः प्रतापी राजा आसीत्, किन्तु परिस्थितिवशात् चित्तौड़ादिस्थानानि आक्रान्तृभिरधिगृहीतानि। अतएव सिंहासनमधिरूढः प्रतापः हस्तच्युतान् प्रमुखदुर्गान् प्राप्तुं चिन्तनमारेभे। प्रथमं सः स्वस्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सभाम् आकारितवान्। तत्रैव सः प्रतिज्ञां कृतवान्-

**''यावत् अहं हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि, तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजप्रासादे वासं न करिष्यामि, मृदुतल्पे च शयनं न करिष्यामि।''**

प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्। अकबरस्य सेनया सह प्रतापस्य अनेकवारं युद्धम् अभवत्। मुख्ययुद्धं हल्दीघाटीस्थाने अभवत्, अतएव एतत् 'हल्दीघाटीयुद्धम्' इति नाम्ना प्रसिद्धमस्ति। अस्मिन् युद्धे प्रतापः 'चेतक' इति नामकम् अश्वम् आरुह्य बहुशौर्यं प्रदर्शितवान्। प्रतापस्य सेना पर्वतीययुद्धेषु कुशला आसीत्। अतएव मुगलसेनायाः अतिक्षतिः जाता। मुगलसेना स्थानीयजनानां विरोधकारणेन परावर्तिता। अस्मिन् युद्धे प्रतापस्य राज्येऽपि जनक्षतिः धनक्षतिश्च संजाता। तस्य सेनाऽपि धनाभावे विघटिता। परं प्रतापः कदापि पराजयं न स्वीकृतवान्। अरण्यगुहाप्रदेशेषु उषित्वा स्वसंकल्पसिद्धये सैन्यसंग्रहणम् उपाक्रमत। सैन्यसंग्रहणं तत्प्रशिक्षणं च बहुवित्तसाध्यं कार्यम्। महता दारिद्र्येण परितप्यमानस्य प्रतापस्य इदमेव बहुचिन्ताकारणमासीत्। प्रतापस्य चिन्तां विभाव्य 'भामाशाह' नामा कश्चित् श्रेष्ठी किमपि महत्कार्यं कर्तुं कालः समायातः इति भावितवान्। सः प्रतापं निकषा गत्वा उवाच–''प्रभो! अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते। तेन भवान् पञ्चविंशतिसहस्रसैनिकान् द्वादशवर्षपर्यन्तं पालयितुं प्रभविष्यति'' इति। तदा प्रतापः उवाच – ''अहं नैतद्धनं स्वीकर्तुं शक्नोमि, एतद् धनं भवता अर्जितमस्ति।'' तदा भामाशाहः प्रावोचत्–''नैतद्धनं परकीयम्। देशरक्षार्थं मया अर्जितमिदं धनं यदि सहायकं भवेत् तर्हि मम जीवनं सार्थकं भविष्यति'' इति। भामाशाहस्य वचनं श्रुत्वा प्रतापस्य मनः असीमसान्त्वनाम् आप्तवान्।

तेन पुनः सैन्यशक्तिसंग्रहकार्यम् आरब्धम्, महासैन्यं स रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्ययुद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्। तस्मिन् काले 'चावण्ड' स्थानं स्थापत्यकलायाः, ललितकलायाः, वाणिज्यस्य, विद्यायाश्च प्रमुखकेन्द्रम् आसीत्।

अन्ते असावधानतया पादे धनुष्-प्रत्यञ्चाघातेन प्रतापोऽस्वस्थोऽभवत्। १५९७ तमे ईस्वीयाब्दे प्रतापः दिवङ्गतः। प्रतापः महान् सेनानायकः, जननायकः, व्यवस्थापकः, सङ्घटनकर्त्ता च आसीत्। भारतवासिनः अधुनापि तस्य स्वातन्त्र्यप्रेमिणः शौर्यगाथां गायन्ति।

## शब्दार्थाः

**उत्सर्ग-परम्परायाः** — त्याग-परम्परायाः (त्याग की परम्परा की)। **उद्भवभूमिम्** — उत्पत्तिस्थानं (उत्पत्तिस्थान)। **शूराणाम्** — वीराणाम् (वीरों के)। **यूनाम्** — युवकानाम् (युवकों के)। **आत्माहुत्या** — बलिदानेन (बलिदान से)। **जगति** — संसारे (संसार में)। **कुशलसेनानी** — निपुण-सेनापतिः (कुशल सेनापति)। **विमुखाः** — पराङ्मुखाः विरक्ताः वा (विपरीत हुए/विमुख)। **साहाय्यम्** — सहायताम् (सहायता को)। **विधाय** — कृत्वा (करके)। **आक्रान्तृभिः** — आक्रमणकारिभिः (आक्रमणकारियों के द्वारा)। **अधिगृहीतानि** — आत्मवशीकृतानि (अधिगृहीत कर लिये गये)। **आरेभे** — आरब्धवान् (आरम्भ किया)। **भिल्लजनानाम्** — 'भील' नामधेयवनवासिनाम् (भीलों की)। **आकारितवान्** — आहूतवान्

(बुलाई)। **हस्तच्युतान्** — स्वनियन्त्रणात् वियुक्तान् (अपने नियन्त्रण से अलग हुए)। **अतिक्षतिः** — अतिहानिः (अत्यधिक हानिः)। **विघटिता** — विशृंखलिता (बिखर गई)। **अरण्यगुहाप्रदेशेषु** — वनक्षेत्रेषु (गुफा एवं वन के क्षेत्रों में)। **उषित्वा** — निवासं कृत्वा (रहकर)। **उपाक्रमत** — अकरोत् (किया)। **बहुवित्तसाध्यम्** — बहुधनेन साधनीयम् (बहुत धन से सिद्ध होने वाला कार्य)। **परितप्यमानस्य** — संतापितस्य (संतापित का)। **श्रेष्ठी** — वणिक् (सेठ/व्यापारी)। **भावितवान्** — विचारितवान् (विचार किया)। **प्रभविष्यति** — समर्थो भविष्यति (समर्थ होओगे)। **धनुष्प्रत्यञ्चाघातेन** — धनुषः प्रत्यञ्चायाः घातेन (धनुष की प्रत्यञ्चा की चोट से)। **दिवङ्गतः** — स्वर्गलोकं गतवान् (स्वर्गवासी हो गये)।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठप्रश्नाः**

१. 'मेवाड़' राज्यम् उद्भवभूमिरस्ति —

(अ) उत्सर्गपरम्परायाः (आ) शूराणां शौर्य्यस्य

(इ) प्रतापस्य (ई) वीराणाम् ( )

२. महाराणा प्रतापस्य वंशः आसीत् —

(अ) पुण्यवंशः (आ) सिसोदिया

(इ) गुप्तवंशः (ई) मौर्यवंशः ( )

३. मुगलैः सह प्रवृत्तं प्रतापस्य मुख्यं युद्धमासीत् —

(अ) चित्तौड़युद्धम् (आ) उदयपुरयुद्धम्

(इ) हल्दीघाटीयुद्धम् (ई) चावण्डयुद्धम् ( )

४. प्रतापाय कः स्वीयं सम्पूर्णं धनं दत्तवान् —

(अ) चेटकः (आ) उदयसिंहः

(इ) हकीम खाँ सूरि (ई) भामाशाहः ( )

**लघूत्तरात्मकप्रश्नाः**

१. मेवाड़राज्यस्य वीराणां नामानि लिखत?

२. प्रतापस्य जन्म कदा अभवत्?

३. प्रतापस्य शासनकाले कः मुगलशासकः आसीत्?

४. प्रतापः कुत्र स्वराजधानीम् अकरोत्?

**निबन्धात्मकप्रश्नाः**

१. मेवाड़राज्यं केन प्रकारेण विश्वस्मिन् जगति प्रसिद्धिम् अलभत्?

२. मेवाड़राज्यस्य वीरपरम्परायां के के वीराः अभवन्?

३. प्रतापस्य प्रतिज्ञा का?

४. प्रताप-भामाशाहयोः वार्तां स्वशब्देषु लिखत।

## उत्तरमाला

**वस्तुनिष्ठप्रश्नाः**

१. (अ) २. (आ) ३. (इ) ४. (ई)

**व्याकरण-प्रश्नाः**

१. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत —

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| **उदा.** | जानाति | ज्ञा | लट् | प्रथमः | एकवचनम् |
| | अलभत् | ..... | ..... | ..... | ..... |
| | विद्यते | ..... | ..... | ..... | ..... |
| | आरेभे | ..... | ..... | ..... | ..... |
| | करिष्यामि | ..... | ..... | ..... | ..... |
| | आसीत् | ..... | ..... | ..... | ..... |
| | प्राप्स्यामि | ..... | ..... | ..... | ..... |
| | प्रारभत | ..... | ..... | ..... | ..... |
| | गायन्ति | ..... | ..... | ..... | ..... |

२. अधोलिखितेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत —

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **उदा.** | परम्परायाः | परम्परा | षष्ठी | एकवचनम् |
| | यूनाम् | ..... | ..... | ..... |
| | आत्माहुत्या | ..... | ..... | ..... |
| | बन्धून् | ..... | ..... | ..... |
| | कर्त्तव्यात् | ..... | ..... | ..... |
| | श्रेष्ठी | ..... | ..... | ..... |
| | कलायाः | ..... | ..... | ..... |
| | भारतवासिनः | ..... | ..... | ..... |
| | सेनया | ..... | ..... | ..... |

३. निम्नलिखितेषु प्रकृति-प्रत्यययोः निर्देशं कुरुत —

| | पदम् | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|---|
| **उदा.** | अलङ्कृत्य | अलम् + कृ | + | ल्यप् (क्त्वा) |
| | प्राप्तुम् | .................. | + | ................ |
| | गृहीतानि | .................. | + | ................ |

| | | | |
|---|---|---|---|
| आकारितवान् | ................ | + | ............... |
| विधाय | ................ | + | ............... |
| जाताः | ................ | + | ............... |
| कृतवान् | ................ | + | ............... |
| अधिरूढ़ः | ................ | + | ............... |

४. अधोलिखितपदानां समासविग्रहं प्रदर्श्य समास-नामोल्लेखं कुरुत —

| **पदम्** | **समासविग्रहः** | **समासनाम** |
|---|---|---|
| उत्सर्गपरम्परायाः | उत्सर्गस्य परम्परायाः | षष्ठीतत्पुरुषः |
| कुशलसेनानी | ...................... | .............. |
| परिस्थितिवशाद् | ...................... | .............. |
| हस्तच्युतान् | ...................... | .............. |
| सुवर्णपात्रेषु | ...................... | .............. |
| जनक्षतिः | ...................... | .............. |
| स्थापत्यकला | ...................... | .............. |
| असावधानतया | ...................... | .............. |
| अरण्य-गुहा-प्रदेशेषु | ...................... | .............. |

५. अधोलिखितान् पदान् आधारीकृत्य वाक्यनिर्माणं कुरुत —

| | **पदम्** | **वाक्यम्** |
|---|---|---|
| **उदा.** | कुशलसेनानी | प्रतापः कुशलसेनानी आसीत्। |
| | राजानः | ................................. |
| | प्रतिज्ञाम् | ................................. |
| | सेनया | ................................. |
| | कुशला | ................................. |
| | सार्थकम् | ................................. |
| | निकषा | ................................. |
| | स्थापत्यम् | ................................. |
| | जननायकः | ................................. |

६. अधोलिखितेषु यथानिर्देशं विभक्तिपरिवर्तनं कुरुत —

| | **पदम्** | **परिवर्तनम्** | **परिवर्तितरूपम्** |
|---|---|---|---|
| **उदा.** | सेनया | (सप्तमी-विभक्तिः एकवचनम्) | सेनायाम् |
| | 1. मम | (चतुर्थी-विभक्तिः एकवचनम्) | .................... |
| | 2. राजानः | (तृतीया-विभक्तिः एकवचनम्) | .................... |

3. तेन (पञ्चमी-विभक्तिः एकवचनम्) ....................
4. श्रेष्ठी (षष्ठी-विभक्तिः एकवचनम्) ....................
5. शत्रुभिः (षष्ठी-विभक्तिः बहुचनम्) ....................
6. कर्त्ता (सप्तमी-विभक्तिः एकवचनम्) ....................

७. उचितपदप्रयोगेण रिक्तस्थानानि पूरयत —

**उदा.** प्रतापः कदापि **पराजयं** न स्वीकृतवान्। (पराजयः)

प्रभो! अहं .......... सेवकः। (भवद्वंशः)

प्रतापस्य सेना ........... कुशला आसीत्। (पर्वतीययुद्धम्)

राजानः ............... सर्वथा विमुखा आसन्। (देशरक्षा कर्त्तव्यः)

प्रतापः हस्तच्युतान् ......... प्राप्तुं चिन्तनमकरोत्। (दुर्गः)

तावत् ........... भोजनं न करिष्यामि। (सुवर्णपात्रम्)

८. अधोलिखितानाम् उत्तराणाम् आधारेण प्रश्ननिर्माणं कुरुत —

**उदा.** प्रश्नः -वीराणां सुदीर्घा परम्परा कस्य विद्यते?

उत्तरम्- मेवाड़राज्यस्य सिसोदियावंशस्य वीराणां सुदीर्घा परम्परा विद्यते।

प्रश्नः ..........................................................................

उत्तरम्- प्रतापस्य जन्म विक्रमस्य १५९७ तमे वर्षे ज्येष्ठशुक्लतृतीयायाम् अभवत्।

प्रश्नः:- ..........................................................................

उत्तरम्- प्रतापस्य राज्यकाले 'अकबर' इति नामकः मुगलशासकः आसीत्।

प्रश्नः ..........................................................................

उत्तरम्- प्रतापः हल्दीघाटीयुद्धे बहुशौर्यं प्रदर्शितवान्।

प्रश्नः ......................................................

उत्तरम्- प्रतापाय भामाशाहः प्रभूतं धनं दत्तवान्।

प्रश्नः ................................................

उत्तरम्- प्रतापः 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्।



